# चतुर्थोऽध्यायः

- स्वामिनारायणभाष्यमाश्रित्य विभूतिविमर्शः, यौगिकविभूतयः।
- सिद्धिप्रादुर्भावः, सिद्धिप्रदर्शनं, सिद्धीनां प्रकाराः।
- वीतरागिणां ध्यानेन विभूतयः।
- योगसिद्धौ सद्गुरुस्थानं महत्त्वञ्च।

# चतुर्थोऽध्यायः

**भारतीयवाङ्मये विभूतिविमर्शः -**

विभूतिशब्दस्य सामर्थ्यम् - सिद्धिः, ऐश्वर्यम्, उपलब्धिः, इत्येते पर्यायाः। विभूतिशब्दस्य वैदिकसंहितास्वपि वर्णनं प्राप्यते। वेदभाष्यकारैः विभूतिशब्दस्य मोक्षपरकत्वम् अर्थो विहितः।

शुक्लयजुर्वेदमाध्यन्दिनीसंहितायां चत्वारिंशत्तमेऽध्याये एकादशमन्त्रे प्रतिपादितम् -

**साभूतिं च विनाशं च यस्तद्वेदोभयं सह।**

**विनाशेन मृत्यु तीर्त्वा सम्भूत्यामृतमश्नुते।।**

**उव्वटभाष्यानुसारेण -**

सभूतिं च समस्तस्य जगतः सम्भवैकहेतुं च परं ब्रह्मास्ति। विनाशं च विनाशिशरीरं च। योगी तदुभयं वेद जानाति सह एकीभूतम्। शरीरग्रहणेन ज्ञानोत्पत्तिहेतुनित्यकर्मणि करोति सः विनाशेन विनाशिना शरीरेण मृत्युं तीर्त्वा उत्तीर्य। सम्भूत्या आत्मविज्ञानेन। अमृतमश्नुते। अमृतत्त्वमश्नातीत्यर्थः।

अन्यच्च -

**अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते।**

**ततो भूय इव ते तमो यद् सम्भूत्यां रताः।।**

अन्धं तमः प्रविशन्ति येऽसम्भूतिमुपासते। मृतस्य पुनः संभवो नास्ति। अतः शरीरग्रहणादस्माकं मुक्तिरेव। न हि विज्ञानात्मा कश्चिदनुच्छित्ति धर्मास्ति यो यमनियमैः सम्बध्यते। एवं ये उपासते ते अन्धमज्ञानलक्षणं तमः प्रविशन्ति ततो भूयो इव ते तमः। ते तमः प्रविशन्ति ये उकारः कर्मोपिसङ्गार्थः। ये सम्भूत्यामेवरताः आत्मैवास्मि नान्यत्किञ्चिदस्तीत्ययमभिप्रेत्य स्वबुद्धिमद्भुतां विभावयन्तः आत्मज्ञान एव रताः।

आभ्यां मन्त्राभ्यां सम्भूतिशब्देन लोकेश्वर्यम् उक्तम् संभूतिशब्देन च आत्मनिष्ठा उक्ता।

गीतायामपि स्थितप्रज्ञस्य महिमा गीताः। स्थितप्रज्ञः इति शब्दोऽपि विभूतेरर्थं द्योतयति। दशमाध्याये भगवता विभूतिमत्सत्त्वानां परिगणनं कृतमस्ति। विशिष्टशक्तिमन्तः प्राणिनः परमात्मनः विभूतिरूपेण सन्ति।

**यद्यद् विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा।**

**तत्तदेवावगच्छ त्वं मम तेजोऽशंसंभवम्।।**[262]

मानवः स्वभावेनैव शक्तेरूपासकः। मानवस्य लौकिकयशोवैभवादिनामपि आधारः शक्तिरेव।

---

[262] श्रीमद्भगवद्गीता 10/41

यत्र यत्र सः शक्तिं पश्यति सः तस्याः उपासको भवति। संसारे यावन्त्य उपासना पद्धतयः वर्तन्ते तासां शक्तिरूपासना एव मूलकारणम्। रामकृष्णविष्णुशिवदुर्गादीनाम् उपासनापि तेषां शक्तित्वात् एव। एतेषां तेजोबलादिकं श्रुत्वा लौकिक उन्नत्यै आत्मलाभार्थं च तेभ्यः शक्तिं कृपां च प्राप्तुं सततं प्रयतते। अज्ञानित्वात् मानवे अत्यल्पसामर्थ्यमस्ति। अत एव देवाः मानवान् पशुन् मन्यन्ते।

**सृष्टिवैचित्र्यम् -**

विचित्रा हि परमात्मसृष्टिः। अस्याम् अनेके पिण्डब्रह्माण्डाः सन्ति। तेषां संरचना तेषु निवसताम् जीवानां जीवनं व्यवहाराश्च परस्परं भिन्नाः सन्ति। यदा वयं अन्यलोकस्य प्राणिनां विषये श्रुणुमः पठामः च तदा आश्चर्यन्वितं भवामः। एवमेव अन्यलोकस्य प्राणिनां कृते अस्मदीयाः भूर्लोकस्य स्थितिः विचित्रैव भाति। त्यजतु अन्य लोकस्य वृत्तम्। अस्मिन्नैव भूर्लोके विभिन्नप्राणिनां शक्तयः परस्परं विभिन्ना एव। एतेषाम् इदं वैचित्र्यम् आलोक्य मानवमनांसि आश्चर्यम् आवहन्ति। अस्या सृष्टेः गूढतमानि रहस्यानि अद्यापि मानवाय रहस्यानि एव।

पुरातत्त्वदर्शिभिः योगिभिः योगदृष्टया अस्य वैचित्र्यविशिष्टायाः सृष्टेः रहस्यं प्रत्यक्षीकृतम्।

योगमतानुसारेण मानवे सर्वाः शक्तयः निहिताः सन्ति। अस्याः केन्द्राण्यपि अस्मिन्नेव पिण्डे सन्ति। योगी इमां केन्द्रशक्तिम् उत्थाप्य ब्रह्मीभूत्वा ब्राह्मीशक्तिं प्राप्नोति। एताः शक्तयश्च योगसाधनेन साध्याः भवन्ति।

अस्मिन् जगति पूर्वकालादेव रजस्तमोयुक्ता: जना: विभिन्नया उपासनया भूतप्रेतादिजनपूर्वकं शक्तिविशेषानुपलभ्य जनेषु स्वप्रभावं स्थापयन्ति। प्राय: ते जनान् प्रताडयन्ति अपकारमपि च कुर्वन्ति। एता: शक्तय: न तेषां आत्मशक्ति: किन्तु भूतादि यजनेन तेभ्य: शक्ति: सम्प्राप्य शक्तिसम्पन्ना: भवन्ति। तत्प्रभावेण धनं मानं च प्राप्नुवन्ति अन्ततोगत्वा "भूतानि यान्ति भूतेज्या" इति भगवद्वचनानुसारेण देहपातानन्तरं तद्वासनावासितान्त:करणत्वात् भूतादि योनिं यान्ति। इत्थं मुहुर्मुहु: आसुरीष्वेव योनिषु पतन्ति। एते आत्मघातिन आत्मघातमेव कुर्वन्ति।

**यौगिकविभूतय: -**

"नायमात्मा बलहीनेन लभ्य:" इति श्रुतिवचनानुसारेण बलहीनेन आत्मदर्शनं कर्तुं न शक्यते।

विभूतय: योगिनां बलम्। योगी एता: स्वपुरूषार्थेन योगसाधनया प्राप्नोति। एता: योगप्रासादस्य सोपानानि। ता: योगिन: श्रद्धां द्रढी कुर्वन्ति। योगस्य एकस्या: भूमिकाया: साक्षात्कारे जाते मुक्तिपर्यन्तं सूक्ष्मवस्तुष्वपि विश्वासं उत्पद्यते।

**यावदेकदेशोऽपि कश्चिन्न स्वकारणं संवेद्यो भवति तावत्सर्वं परोक्षमिव अपवर्गादिषु सूक्ष्मेष्वर्थेषु न दृढाबुद्धिमुत्पादयति। तस्माच्छास्त्रानुमानाचार्योपदेशोयोदुर्बलनार्थमेवावश्यं कश्चिद् विशेष: प्रत्यक्षीकर्त्तव्य:।।**[263]

गीतायामपि भगवता अविकम्प्रयोगप्राप्तये विभूते: महत्त्वं प्रतिपादितम्।

**एतां विभूतिं च योगं च मम यो वेत्ति तत्त्वत:।**
**सोऽविकम्पेन योगेन युज्यते नात्र संशय:।।**[264]

भारतीयसंस्कृतिसाहित्यपटस्य एकैकं तन्तु: योगिनां भक्तानां च अलौकिक चरित्रेण ओतप्रोतं वर्तते। तेषां साधना जीवनदर्शनस्य संस्कृते: सभ्यतायाश्च अभिन्नमङ्गम्। प्राचीनकालादारभ्य ऋषीणां मनीषीणां च अलौकिकयोगजऋतम्भराज्ञानेन अस्माकं

---

263 व्यासभाष्यम् 1/35

264 श्रीमद्भगवद्गीता 7/10

ज्ञानविद्यानये चरमोत्कर्ष: लब्ध:। अनेनैव अलौकिकज्ञानेनैव अस्माकम् आयुर्वेद-सङ्गीतसाहित्यनाटकान्यपि नि:सृतानि सन्ति। यदा साधक: ध्यानयोगेन सूक्ष्मत्वं प्राप्नोति तदा स: गुह्यतत्त्वानि प्रत्यक्षी करोति। एतेषां रहस्यानाम् उदघाटनमेव सिद्धय:। योगी शनै: शनै: योगाभ्यासेन सर्वाणि प्राकृतानि तत्त्वानि जयति। तस्य आभ्यन्तरशक्तेरेव इदं फलम्।

योगसाधनया योगी ज्ञानम् ऐश्वर्यं च युगपदेव प्राप्नोति। आधुनिकविज्ञानेनापि प्रकृतिनियमान् अवगम्य अनेके अविष्कारा: कृता:। शब्दाकाशसम्बन्धसंयमात् यदा योगी दिव्यश्रवणं दिव्यदर्शनं लभते तथैव भौतिकविज्ञाने शब्दाकाशयो: सम्बन्धं विज्ञाय दूरश्रवणं (रेडियो) दूरदर्शनं, टेलीविजनादि यन्त्राणाम् आविष्कार: कृत:। परं तेषाम् इयमुपलब्धि: यन्त्राधीना:। योगिन: शक्ति: तस्य अध्यात्मनिष्ठा जायते। प्रकृतिज्ञानेन तस्या: वशीकारेण च योगी अतुलितां शक्तिं प्राप्नोति।

**सिद्धिप्र्रादुर्भाव: –**

मानवमन: स्वरूपतात्यन्त शक्तिसम्पन्नोऽस्ति। मनस: चञ्चलता एव अस्य शक्ति: विभजते। परन्तु चित्तैकाग्र्येण अयमेव शक्तिसम्पन्नो भवति। एकाग्रता स्वत: एव शक्तय: प्रादुर्भवन्ति। "सिद्धि:" इति शब्दस्य दार्शनिकोऽर्थ: कायचित्तेन्द्रियाणामाभिष्टुत्कर्ष:। योगमतानुसारेण कारणचित्तं कार्यचित्तयोर्भेदेन अस्य विभेदो भवति। कारणचित्तम् आकाशवत् विभु:। कार्यचित्तं हि विभिन्नजीवेषु भिन्नरूपेण वर्तते। जीवानामानन्त्येन कार्य चित्तमपि अनन्तमस्ति।

एतानि चित्तानि जीवानां दु:खस्य च कारणानि। कार्यचित्रित्तं विभिन्नासु योनिषु सङ्कोचविकासतां याति। कारणचित्तं सदैव पुरूषेण सह सम्बन्धमस्ति। इदं कार्यचित्तं नवीनशरीरेषु शुभाशुभसंस्कारै: अभिव्यक्ततां प्राप्नोति। चित्तद्वयमपि जडरूपेण अस्ति। एतयो: चेतनत्वं पुरूषसान्निध्येनैव। योगस्य लक्ष्यम् इदमस्ति यत् योगसाधनया व्यष्टिचित्तस्य (कार्यचित्तस्य) समष्टिचित्तेन (कारणचित्तेन) सह तादात्म्यं संस्थाप्य समस्तचित्तेषु सम्बन्धं सम्पादयेत्। चित्तेकाग्र्येण तपसा च चित्तशक्ति: विस्तीर्यते। फलत: चित्तम् असीमितं शक्तिसम्पन्नं च भवति।

योगसिद्धय: योगिन: साधनाफलसूचका: भवन्ति। यथा काशीं लक्षीकृतस्य पार्थकस्य मार्गेअनैकानि तीर्थानि स्वयमेव समायान्ति तानि तीर्थानि सम्प्राप्तु न पृथक् प्रयत्ने अपेक्षते। तथैव मोक्षे साधकस्य सिद्धय: समायान्ति।

**यया काशीं समुद्दिश्य गच्छद्भिः पथिकैः।**

**नाना तीर्थानि दृश्यन्ते तथा मोक्षेऽपि सिद्धयः।।**[265]

योगशिखोपनिषद्यपि

**यथाकाशं समुदिश्य गच्छद्भिः पथिकैः पथि।**

**नानातीर्थानि दृश्यन्ते नानामार्गास्तु सिद्धयः।।**

**परीक्षकैः स्वर्णकारैर्हेम सम्पोक्ष्यते यथा**

**सिद्धिभिर्लक्षयेत् सिद्धं जीवन्मुक्तं तथैव च।।**[266]

साधनारूठयोगिनि एते सिद्धिरूपलौकिका गुणाः अवश्यमेव दरीदृश्यन्ते। एते अलौकिक गुणा एव सिद्धिरूपेण सन्ति।

**अलौकिकगुणस्तस्य कदाचित्तद् दृश्यते ध्रुवम्।**

**इत्येतद् कथितं देवि योग सिद्धस्य लक्षणम्।।**[267]

सिद्धिभिः परिवहनं तु बद्धमेव परिलक्ष्येत इति योगबीजे उक्तं भगवता शिवेन योगाशिखोपनिषदि च।

**अलौकिक गुणास्तस्य कदाचिद् दृश्यते ध्रुवम्।**

**सिद्धिभिः परिहीनं तु नरं बद्धं तु लक्षयेत्।।**[268]

---

[265] यो. बी.-170-171

[266] योगशिखोपनिषद् प्र. अ.-157-159

[267] यो. वी.-173

[268] योगशिखोपनिषद् 1/160

ऐश्वर्यत्वम् एवम् ईश्वरत्वम् यथा पुरूषे धावति तमनुधावति तथैव ऐश्वर्याणि योगिन अनुगमनं कुर्वन्ति।

**ऐश्वर्यमीश्वरत्वं हि तस्य नास्ति पृथक् स्थितिः।**

**पुरूषे धावमानेऽपि छाया तमनुधावति।।**[269]

केचित्तु सिद्धीनां निन्दां कुर्वन्तः तस्याः हेयत्वं प्रतिपादयन्ति। परं तैः अत्रेदमवधेयं यत् यथा अग्निना ज्ञानपूर्वक स्पर्शेन अथवा अज्ञानपूर्वकस्पर्शेन शरीरं दग्धं भवत्येव। तथापि अग्नेः त्यागो न विधीयते तथैव सिद्धिविषये अवगन्तव्यम्। "स्वकार्यं साधयेत् धीमान् कार्य भ्रंशो हि मूर्खता"। सिद्धिविषयेऽपि एवमेव। योगिनां सकाशेऽपि सिद्धयः उपयान्ति। किन्तु यो एषणात्रयेप्यासक्तो न भवति।

तस्यैव पतनभयं नास्ति। ज्ञानोदये सति ऐश्वर्योदय अवश्यम्भाविनः। ईश्वरस्य भावो हि ऐश्वर्यम्। तच्च आत्मस्वरूपतः न पृथगस्ति। ज्ञानोदये आत्मनः आवरणक्षयाच्च आत्मस्वभावः स्वत् एव उदेती। ज्ञानोदये एश्वर्यप्रकाशः स्वयमेव भवति। यथा पुष्पे विकसिते सति मकरन्दस्य विकासो भवति।

विभूतयः अत्यन्त श्रद्धावन्तं जितेन्द्रियं च समायान्ति। कश्चिदेव साधकः सिद्धिर्भाक् भवति। सिंहिन्याः दुग्धं स्वर्णपात्र एव तिष्ठति इति प्रसिद्धा उक्तिः। गीतायां भगवता कृष्णेनापि अभयपदप्राप्तये "निर्मानमोहाः जित सङ्गदोषाः"[270] इत्यनेन वचनेन

---

[269] 'सुरेश्वर कृत मानसोल्लास'

[270]. श्रीमद्भगवद्गीता- 15/5

निर्दिष्टं यत् असंयतात्मना न शक्यते प्राप्तुं सिद्धिः परं पदम् च। अन्यत्रापि सिद्धिरूपयोगः असंयतात्मनः न प्राप्तुं शक्यते इति उक्तम्।

**असंयतात्मने योगो दुष्प्राप इति मे मतिः।**[271]

विभूतयः संयतात्मनः साधकस्य स्वयमेव वृणुते। साधकः वेदान्तमार्गानुगामी भवेत् अथवा भक्तिमार्गानुगामी भवेत् सिद्धयः समुपतिष्ठन्ति एव। यतोहि विभूतयः चित्तवृत्तिनिरोधस्य फलरूपेण भवन्ति। अद्वैतवादी आद्यशङ्कराचार्याः सिद्धिसम्पन्नमहापुरूषा आसन्।

भक्तानां जीवनचरितानि अलौकिकानि वर्तन्ते। विभूतिप्रादुर्भावविषये गोपीनाथकविराज महाभागानां मतम् **''जीवनस्योपाधिः मलिनसत्त्वम् अस्ति।''** सोऽपि साधनया यदा शुद्धो भवति तदानीमैश्वर्यं प्रस्फुटी करोति। किन्तु इदं सत्त्वं कियदपि शुद्धं भवेत् रजस्तमोगुणाभ्यां स्पर्शेन कदापि कृत्स्नरूपेण विमुक्तं न भवति। अत एव जीवनस्य साधनलब्धैश्वर्यं तस्य प्रकृतिसम्बन्धविहीना कैवल्यावस्थायां न तिष्ठति। अत एव योगिन ऐश्वर्यं कैवल्यपादे विघ्नरूपेण कथयन्ति। किन्तु स्वभाविकविशुद्धसत्त्वजनितैश्वर्यं परमात्मनः स्वभावः स्वरूपं वा भवति। भगवत् कृपया जीवे विशुद्धसत्त्वस्य सञ्चारे सति ऐश्वर्यस्य स्फुरणं भवति। किन्तु इदमैश्वर्यं मुक्तौ प्रतिबन्धकं न भवति, प्रत्युत् बद्धावस्थायामस्य आविर्भावोऽपि न भवति। जीवो यदा स्वविशुद्धपरमात्मभावं लभते तदा स्वयमेव तस्य स्वभावभूतस्य

---

[271]. श्रीमद्भगवद्गीता- 6/36

अलौकिकैश्वर्यस्य अभिव्यक्तिर्भवति। बौद्धाचार्याणां मते अर्हतभावे उदिते सति अर्थधर्मनिरूक्तिप्रतिभावानां चतुर्विधानां प्रतिसंवित् एवम् ऋद्धि दिव्यश्रोत्र-परचित्तज्ञानं स्वस्य परस्य पूर्वजन्म-स्मृति-दिव्य-दृष्टीनां पञ्च प्रकाराया अभिज्ञाया उदयो भवति। बुद्धगणाः वैराग्येण एतामभिज्ञां लभन्ते। ऋद्धेः प्रकारद्वयं वर्तते।

आकाशगमनं निर्मितं सङ्कल्पबलेन विषयनिर्माणम् च भवति। वहनगतिः अधिमोक्षगतिः, इति बौद्धग्रन्थेषु तिस्त्रो गतयः समुपलभ्यन्ते। आकाशचारी पक्षी यथा नभसि गमनं करोति तथैव योगी ऋद्धिबलेनाकाशे आरोहणं विचरणञ्च करोति। इयं प्रथमप्रकारा गतिरस्ति। तथा च इयं देहस्य गतिरस्ति। श्रावकः बुद्धश्च इमां मतिं लभते। योगिनः सङ्कल्पशक्त्या दूरस्थानि वस्तूनि सङ्कल्पक्षण एवोपस्थितानि भवन्ति। अस्या एव नामधेयम् अधिमोक्षगतिः।

तृतीयप्रकारस्य मनोवेगगतिः।[272] केवलं बुद्धिस्वयैव सम्भवति न तु साधारणयोगिनः। निर्मितस्य अथवा विषयनिर्माणस्य प्रकारद्वयं वर्तते। प्रथमः कामधातुगतः द्वितीयश्च रूपधातुगतः। कामधातुगतादुत्पन्ने रूपरसगन्धस्पर्शः इति चतुर्विध अंशा भवन्ति। एतद् स्वशरीरस्य अन्यस्य शरीरसम्बन्धो सम्भवति। रूपधातोः निर्माणे केवलं रूपस्पर्शो भवतः। नान्यत् किमपि।

[272] पातञ्जल योगदर्शने इयं सिद्धिः मनोजवितानाम्ना प्रसिद्धा। इयं च प्रधानजनस्य फलं तथा चमधुप्रतीकसिद्धेरन्तर्गतम्। पाशुपतदर्शनेऽपि मनोजवित्वसिद्धेः विशेषवर्णनं लभ्यते।

महापरिनिर्वाणादिग्रन्थेषु ऋद्धिरनेकभेदानाम् उल्लेखो प्राप्यते। एकस्मात् अनेकत्वम्, अनेकत्वात् एकीभवनम्, आविर्भूतत्त्वं तिरोहतत्त्वं योगिनो भवन्ति। यथा कश्चिद् जले निमज्जति उन्मज्जति च तथैव अयं भूमौ उन्मज्जति निमज्जति।

आकाशसञ्चरणम्, चन्द्रसूर्ययोः स्पर्शक्षमता, ब्रह्मलोकपर्यन्तं सर्वलोकवशीकार:इत्येताः सर्वाः सिद्धयः ऋद्धयन्तर्गतं मन्यन्ते। ये केचनाकिञ्चनाः दीनाश्च सन्ति ते यथार्थे भक्तिपरायणाः भवन्ति। ते सदैव स्वात्मानं भगवदाश्रितं मन्यन्ते। अनेन प्रकारेण तेषामिच्छा सर्वातिशयिनि भवति। वस्तुतः एतादृशानां भक्तानां शक्तिरपरिमेया। अग्निसम्बन्धेन दाहशक्तिरूत्पद्यते। अनेनैव प्रकारेण सर्वेश्वरेण सह योगप्रतिष्ठिते सति जीवोऽपि यदि स्वाधारधारणाशक्त्यानुसारेण सर्वैश्वर्यं लभेत् तदत्र आश्चर्यं नास्ति। यथा चन्द्रमसि क्रमशः ह्रासो भवति अमा च समायाति तथैव ऐश्वर्यस्य पूर्णे विकासे जाते क्रमशः तस्य विसर्जनमपि स्वयमेव भवति। अयमेव आत्मसमर्पणयोगः। अयं च प्रकृतेः स्वाभाविकव्यापारः।

श्रीमद्भागवतमहापुराणे एकादशस्कन्धे -

**जितेन्द्रियस्य दान्तस्य जितश्वासात्मनो मुनेः।**

**मद्धारणां धारयतः का सा सिद्धिः सुदुर्लभा।।**[273]

तथा च श्रीमद्भगवद्गीतायाः द्वादशाऽध्याये -

[273] भागवतपुराणम् एकादशस्कन्धे अ.-14

**मय्येव मन आधत्स्व मयि बुद्धिं निवेशय।**

**निवेसिष्यसि मय्येव अत ऊर्ध्वं न संशयः॥**[274]

भगवता श्रीकृष्णेन भगवतः सगुणध्यानेन सिद्धिप्रादुर्भावस्य सङ्केतो विहितः। भगवति मनबुद्ध्योः समाहितयोः सकलाः सिद्धयः स्वयमेव उपस्थिताः भवन्ति।योगदर्शने विभूतिपादे वर्णिताः सकलाः सिद्धयः संयमजन्याः सन्ति। ''समाधिसिद्धिरीश्वरं प्रणिधानात्''[275] इति सूत्रेण पतञ्जलिना ईश्वरप्रणिधानादपि समाधिसिद्धिर्भवति इति सिद्धान्तितम्। श्रुतिस्मृतिपुराणेष्वपि सगुणोपासनया प्राप्तव्यानां सिद्धीनां वर्णनं बाहुल्येन प्राप्यते।

अतोऽत्र निष्कर्षः समायाति यत् सिद्धय अष्टाङ्गयोगसाधनेन वीतरागिणां ध्यानेन तथा च भगवद्ध्यानेन इति अनेकैरूपायः प्राप्तुं शक्यन्ते।

योगिनां भक्तानां च जीवनचरितेषु नैकविधाः सिद्धयः श्रूयन्ते दृश्यन्ते च।

---

[274] श्रीमद्भागवद्गीता 12/8

[275] पातञ्जलयोगसूत्रम् 2/45

### सिद्धिप्रदर्शनम् -

सिद्धीनां प्रदर्शनं साधकेन न कर्त्तव्यम्। यतोहि एतासां प्रदर्शनेन एता अस्तङ्गता भवन्ति। यथोक्तं शिवसंहितायां भवेद्वीर्यवती गुप्ता निर्वीया च प्रकाशिता इति[276] प्रदर्शनेन योगिनः पतनं सम्भाव्यते।[277] अहङ्कारस्य पोषणं च भवति। अत एव उच्यते यत् यथा काचित् कुलीना स्त्री स्वशरीरस्य अङ्गादि वस्त्रापसरणे त्वरया तदङ्गम् आच्छादयति तथैव योगी स्वशक्तिं गोपयति। करूणाभयमहापुरूषाः सद् गुरवश्च स्वशक्तिं न प्रदर्शयन्ति, परं सा स्वयमेव प्रदर्शिता भवति। ते स्वभक्तानां दुःखितानाम् आर्तस्वरम् आकर्ण्य अवश्यमेव द्रवीभूताः भवन्ति। योगैश्वर्येण आर्तेषु कृपां कुर्वन्ति दुःखानि च विधुन्वन्ति। तस्यां कृपया सत्यां महापुरूषस्य योगैश्वर्यस्य परिचयः स्वयमेव भवति। अतः महापुरूषाः स्वशक्तेः प्रयोगं जीवानां कल्याणाय कुर्वन्ति। आत्मकामोऽपि सन् विश्वकल्याणाय महत्कार्याणि स्वशक्तया संकल्पेन च सम्पादयति। किन्तु ते संसारस्य रङ्गमञ्चे दृग्गोचरी न भवति। जनाः कथयन्ति स्मः यत् हिमालयस्य योगिनः जनान् आलोकं दर्शयित्वा तान् कल्याणपथं दर्शयन्ति। किन्तु जनाः जानन्ति यत् अयं प्रकाशः कुतः समायातः इति। सिद्धिप्रदर्शनं विषये वङ्गदेशस्य प्रसिद्धि योगी लाहिडी महाशयः कथयति स्म सामान्यजनान् प्रति अज्ञात

---

[276] शिवसंहिता 5/250

[277] स्थान्युपनिमन्ङ्गणे सङ्गस्मयाकरणं पुनरानिष्टप्रंसङ्गात् - 3/51

सूक्ष्मविषयान् सुपात्रादिविचार: विनैव चर्चा न कार्य: तेषां प्रकाशोऽपि न विधेय:।[278] सिद्धीनां प्रदर्शनं कदाचित् साधकस्य मृत्युकारणमपि भवितुं शक्यते। परमहंसविशुद्धानन्दस्य सिद्धिप्रदर्शनविषये मतम्- विभूति प्रदर्शनस्य न ममोद्देश्यं यदहम् आत्मैश्वर्यं प्रदर्श्य तेन युष्माकं श्रद्धां जागृतं कारयामि अथवा प्रभावं उत्पादयामि।

मम तु इदमेवोद्देश्यं यत् सिद्धि: वा दृष्ट्वा शिष्या: भक्तगणाश्च महाशक्त्याम्, ईश्वरे देवीदेवतासु, धर्मे, मन्दिरेषु प्रभुचर्चायां साधुषु इन्द्रियातीतविषयेषु प्रेरणां लभेरन्, तेषां श्रद्धाविश्वासो वर्धेताम्, सन्मार्गे प्रचलेयु:, पूजाक्रियादिषु च दृढतया संलग्ना: भवेयु:। प्रथमप्रविष्टाय जिज्ञासवे सिद्धिप्रदर्शनमावश्यकम्। सूक्ष्मरहस्यान् प्रदर्श्यैनम् आवगमयितुं शक्यते इति। ये केचित् शिक्षार्थिन: सन्ति इदानीमेव योगमार्गे प्रविष्टा: तेषां कृते योगविभूतीनां प्रदर्शनं हानिकारम्, अनुचितं च वर्तते। यतोहि अनेनाहङ्कारस्य आसक्तेश्च वृद्धिर्भवितुमर्हति। एता: शक्तय: इत्थरूपेण गोपनीया यत् निकटस्थोऽपि जन: ज्ञातं न शक्नुयात्। किन्तु ये केचन सिद्धयोगिन: सन्ति अधिकारिणश्च वर्तन्ते तेषां कृते नास्ति अयं नियम:। ते च अहङ्काररहिता: सन्ति अहङ्कारागमनस्य शङ्कापि नास्ति। तेषां दृष्टौ एतासां शक्तीनां न किमपि प्रयोजनमस्ति।

---

[278] योगी कथामृत योगानन्द कृत-पृ. सं.-479

एतासु ते पूर्णताया विजयं प्राप्तवन्तः। किन्तु प्रथमप्रविष्टाय जिज्ञासवे प्रयोजनानुसारेण एतासां प्रदर्शनम् आवश्यकमस्ति।

प्रदर्शनं विना क्रमं अनवबोधयित्वा च तेषां कृते सूक्ष्मे तत्त्वे प्रवेशनं काठिन्यं वर्तते। प्रथमं प्रवेशार्थिनः दृढः विश्वासाय प्रदर्शनमावश्यकम्। साधारणतया जनाः यदसंभवं मन्यन्ते तदसंभवं नास्ति। सिद्धयोगिनः कृते किमपि वस्तुं अप्राप्यं न भवति। यतोहि शक्तिधीना सर्व वर्तते। अतः शक्तिनाम् आयत्ने सर्वमपि संभवति। अघटनस्य घटनं शक्त्याधीनं वर्तते।[279]

सिद्धिविषये कथयन्ति स्म यत् योगिजनैः समुद्रं पीत्वापि शुष्कौष्ठवद्भिर्भवितव्यम्। गुरूणाम् अथवा सिद्धपुरूषाणां समक्षे सिद्धिप्रदर्शनेन आसां दुरूपयोगेन एकस्मिन् क्षणैनैव एताः सिद्धयः अदर्शनं यान्ति।

संसारे एतादृशाः जनाः स्वं योगविद्यां प्रदर्शय अपकारं पापाचरणं च कुर्वन्ति। किन्तु अन्ते आसुरीषु योनिषु पतन्ति। अत एव योगसिद्धयः प्रयत्नतः गोप्याः। यथा शिवसंहितायां प्रमाणं वर्तते।

**भवेद्वीर्यवती गुप्ता निर्वीया च प्रकाशिता।**[280]

---

[279] मनीषी लोकयात्रा, पृ. सं.-138

[280] शिवसंहिता -250

**सिद्धीनां प्रकारा: -**

योगदर्शनस्य कैवल्यपादस्य प्रथमसूत्रे सिद्धि प्रकारा: निरूपिता: सन्ति।

**जन्मौषधिमन्त्रतप: समाधिजा: सिद्धय**[281] तासां निरूपणं क्रियते।

**जन्मजा -**

जन्मनैव प्राप्तसामर्थ्य विशेष: जन्मजा सिद्धिरिति आख्यायते योनि विशेषे इयं सिद्धि: यावज्जीवनं तिष्ठति। यथा - पक्षिणां खेचरत्वं, मत्स्यादीनां जलचराणां जलप्लावनम्। कस्मिश्चिद् देवनिकाये जन्मनैव अणिमाद्या: सिद्धय: भवन्ति। भवप्रत्ययवतां योगिनां योगभ्रष्टानां च जन्मना एवं अनेका: सिद्धय: दृश्यन्ते श्रूयन्ते च।

**औषधिजा -**

आयुर्वेदस्य रसशास्त्रेषु पारद स्वर्णादि प्रयोगेन दिव्यदेहस्य दीर्घायुश्च प्राप्तेरूपायानां वर्णनं लभ्येते। च्यवनादि ऋषीणां कायाकल्पस्य वर्णनं लभ्यते। तालुनी पाराबन्धनेनापि आकाशगमनं शक्यते। काचन् दिव्यौषधय: सन्ति यासां चित्तैकाग्रता आत्मविकासाय च महत्वपूर्ण योगदानं वर्तते। संजीवन्यौषधि प्रयोगेन लक्ष्मणस्य प्राणरक्षा अभवत् इति विश्रुतमस्ति।

**मन्त्रजा -**

मन्त्रेषु अदभुता शक्ति: विहितास्ति। सर्वविध तन्त्र यन्त्र प्रयोग मन्त्राणां प्रयोग आवश्यक:। मन्त्राधीनाश्च देवता। मन्त्र जपात् इष्टदेवसम्प्रयोग: भवति।

---

[281] पाजञ्जलयोगसूत्रम् 4/1

"**स्वाध्यायादिष्ट देवता सम्प्रयोग:**"[282] मन्त्र जपेनापि आकाश गमनादि सिद्धय: प्राप्यन्ते। राजयोगे समाधिसिद्धि: प्राप्ते मन्त्रजपस्य विशिष्टोपयोगिता वर्तते।

**तपोजा** -

तपसा विविधा: सिद्धय: समुपजायन्ते। तपसा देवा: मृत्युमुपाघ्नत्। योगज्ञै: प्राणायामं परमं तप: कथ्यते। अस्य फलं प्रकाशावरणक्षय:। "**तत: क्षीयते प्रकाशावरणम्**"[283] तपसिद्धौ योगी कायिकेन्द्रिय सिद्धि: प्राप्नोति। उपनिषत्सु "तपसा चीयते ब्रह्म" इति प्रतिपादितम्। नातपस्विनो योग: सिद्धयतीति योगभाष्ये व्यासवचनम्।[284]

यमनियमानामपि परिगणनं तपसि एव कर्तुं शक्यते। यतोहि यमनियमादय: मनस: तपांसि सन्ति। महर्षि विश्वामित्रेण स्व तपोबलेन नवा सृष्टी रचिता। तपसा मलावरणक्षये जाते आत्मदर्शनं भवति।

**समाधिजा** -

समाधिजन्या: सिद्धि: समाधिजा: सिद्धि: कथ्यते। इयं च सिद्धि: विवेकख्यातये परमोपादेया। योगदर्शनस्य विभूतिपादे वर्णिता: सिद्धय: समाधिजा सिद्धय: सन्ति। एताश्च संयमजन्या:।

---

[282] .पातञ्जलयोगसूत्रम् 2/44

[283] पातञ्जलयोगसूत्रम् 2/52

[284] योगसूत्रव्यासभाष्यम् 2/1

अन्य योगग्रन्थेष्वपि समाधिजा सिद्धीनां वर्णनं बाहुल्येन प्राप्यते। समाधिजा सिद्धयः एव कैवल्यलाभे उपादेयाः सन्ति। ताभिः सिद्धिभिः कर्माशयः नाशो भवति। **ततः क्लेशकर्म निवृत्तिः**[285] कर्मादाहकत्वं सामर्थ्यम् आसु सिद्धिषु विद्यते। भारतवर्षे योगिनां जीवनचरितं समाधिजाभिः सिद्धिभिः परिपूरितमस्ति।

समाधिर्हि योगस्य चरमामङ्गमतः समाधिना सर्वमवाप्यते। समाधि सिद्धौ सर्वाः सिद्धयः योगिनः समक्षे उपतिष्ठन्ति परञ्च योगिनः कृते ताः सिद्धयः उपेक्षिणया एव। यतोहि यदि योगी सिद्धिषु लिप्तो भवति, तत्र रागविशषोत्कर्षात् शीघ्रमेव योगमार्गात् मोक्षमार्गात् आत्मसाक्षात्कारलक्ष्यात्प्रच्युतो भवति।

[285] पातञ्जलयोगसूत्रम् 4/30

**वीतरागिणां योगिनां विभूतिः -**

योगदर्शने समाधि प्राप्त्युपायेषु एकः उपायः "वीतराग विषये वा चित्तम्।[286]" इत्यस्ति। वीतरागिणां पुरूषाणां ध्यानेन तेषु लये सति दिव्याः शक्तयः साधकस्याऽवरणं कुर्वन्ति। अस्य सूत्रस्य कृष्णद्वैपायनः स्वकीयैः भाष्यैः सनकादिनां ध्यानस्य संकेतः कृतः।

गीतायामपि भगवता कृष्णेन सगुणोपासनायाः विधिं अर्जनं प्रति उपदिशन् "मय्येव मन आधत्स्व मयि बुद्धिं निवेशय"[287] इत्युक्तम् इत्थं करणेन त्वं मय्यैव निवसिष्यिष्यति इति।

मन बुद्धितदाकाराकारितया वीतरागी पुरूषस्य दिव्यत्वं साधके उपजायते। सुगुणोपासनायाः इदमेव लक्ष्यम्। इष्टे लये सति शनैः शनैरविद्यादि क्लेशानामपि उन्मूलनं जायते। वृजगोप्य अनया विधिना समाधि अलभन्। कृष्णं ध्यायं ध्यायं तस्मिन् लयं प्रापुः। परिणामत अस्याम् अवस्थायां सर्वाः गोपिकाः स्वान् कृष्णमेव पश्यन्ति स्म।

भारतवर्षे सतीनाम् अलौकिक चरितैः पूरिताः सन्ति अस्मद् ग्रन्थाः। एताः सत्यः स्वयोगिपतिख्यानेन तस्य प्रभावेण च दिव्यशक्तिसम्पन्ना बभुवुः। अत्र सत्या अनुसूयायाः नाम विशेषेण उल्लेखनीयमस्ति। अन्यत्रापि सतीनां दिव्यचरितस्य कारणं

---

[286] पातञ्जलयोगसूत्रम् 1/37

[287] श्रीमद्भगवद्गीता अ. 12/8

तासां वीतरागिपतिनां ध्यानमेवास्ति। अनसूया, गान्धारयादीनाम् अनुग्रहशापसामर्थ्यं तासां पतिव्रत धर्मेण एव।

शिष्योऽपि एवं विधध्यानेन गुरोः मनसि बुद्धौ च स्वमनसो बुद्धेश्च लयं कृत्वा दिव्यशक्तिं अन्तर्ज्ञानं च प्राप्तुं शक्नोति। ननु कपिलादयः सिद्धपुरूषः अन्ये गुरवश्च इदानीं न विद्यन्ते तदा तेषां ध्यानेन कथं विभूतयः संभवन्ति।

अत्रोच्यते - वीतरागिणां योगिनां सूक्ष्मशरीरमपि प्रकृतित्वात् मूलप्रकृतौ विद्यमानं भवति। योगदर्शने अस्य सिद्धान्तस्य निरूपणमस्ति।

**कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात्।**[288]

ध्यानयोगप्रक्रियायां साधकः वीतरागिपुरूषाणां सूक्ष्मशरीरेण तादात्म्यं प्राप्नोति। सः तैः प्रदत्तमार्गस्य उपदेशमपि ग्रहीतुं शक्नोति। तेषां निरन्तरध्यानेन तेषां सकला विद्याः शक्तयश्च स्वत एव साधके प्रकटयन्ति। भक्तिमार्गेऽपि सुगुणोपासनाया इष्टस्य शक्तयः भक्तेः समायान्ति। अत एव तेषां चरितानि अलौकिकानि सन्ति।

[288] पातञ्जलयोगसूत्रम् 2/22

**योगसिद्धौ सद्गुरूस्थानं महत्त्वं च -**

आचार्यवृद्धि पुरूषो वेद इति श्रुतिघोषानुसारेण आचार्यवान् एव परमपुरूष ज्ञातुमर्हति। योगसिद्धावपि सद्गुरो अतीव महत्त्वं प्रतिपादितम्। अत: गुरो: महत्त्वस्य ज्ञानार्थं सर्वप्रथमं शास्त्रेषु सदगुरूतत्त्वस्य केन रूपेण प्रतिपादनं किञ्च गुरो: लक्षणम् इत्यादि विचार: आवश्यक:। योगदर्शने भगवता पतञ्जलिना परमेश्वर एव सर्वेषां गुरू: कालादवछिन्नत्वात् इति गुरूविषंये उक्तम्। एतेन ज्ञायते यत् गुरूतत्त्वं कालातीतम्। वेदान्तदर्शने च देशकालवस्तुपरिच्छेदरहितं परब्रह्म इति कृत्वा ब्रह्मण: लक्षणं प्रतिपादितम्। तदेव ब्रह्म सत्यं ज्ञानमनन्तमादि अनेके नामभि: शास्त्रेषु परिभाष्यते।

योगदर्शने येनरूपेण यै: पदै: परमगुरो व्याख्या कृता तान्येव पदानि वेदान्ते ब्रह्मण: बोधनार्थं प्रयुक्तानि। अनेन ज्ञायते यत् व्यापिका परम सत्ता एव परमगुरूरीश्वर: परब्रह्म वा भवितुमर्हति। सा एव सूक्ष्मगतिसूक्ष्मा परमा सत्ता। अस्या: विषये एव श्रुतिषु "सा काष्ठा सा परा गति:" इति वाक्यै: तस्या सर्वोत्कृष्टता प्रतिपादिता। श्रुतिषु गुरूरेव हरि: साक्षात्, गुरू: साक्षात् नारायण एव, स एव परमब्रह्म, स एव ब्रह्मा, स एव विष्णु, स एव महेश्वरादि वाक्यै: पदै: वा गुरो: ईश्वरस्य च अभिन्नता शास्त्रेषु प्रतिपादिता।

**गुरूरेव हरिः साक्षान्नान्य इत्यब्रवीच्छ्रुति।**[289]

अतः गुरूः ब्रह्मादि देवत्रयात्मकः। एवमेव श्रुतिषु गुरूः ईश्वरः, आत्मा च इत्येतेषां त्रयाणामेव एकरूपतापि प्रतिपादिता। तथा यथा ईश्वरस्य पूजा विहिता तथैव गुरूः पूजाया अपि आदेशः शास्त्रेषु स्पष्टरूपेण उपलभ्यते। ईश्वरो गुरूरात्मेति त्रिषु भेदबुद्धिः न करणीयः। यतोहि अत्र केवलं नाम भेदः न तत्त्वभेदः।

**अद्वैतं भावयेत् भक्त्या गुरोर्देवस्य चात्मानः।**[290]

योगशिखोपनिषदि त्रिषु लोकेषु गुरोधिकं अतिरिक्तं वा न किञ्चिदप्यस्ति इति प्रतिपादितम्।

**गुरूर्ब्रह्मा गुरूर्विष्णुर्गुरूदेवः सदाच्युतः।**
**न गुरोरधिकं कश्चिद् त्रिषु लोकेषु विद्यते।।**[291]

पद्मपुराणोक्तगुरूगीतायाम् शिव-पार्वतीसंवादे "नास्ति तत्त्वं गुरोः परम्" इत्यभिधाय गुरूरेव ईश्वर आत्मपि इति त्रयाणाम् एकत्वस्य पुष्टिः कृता। अन्यत्रापि श्रुतिषु गुरूरेव परब्रह्म गुरूरेव परमा गतिः गुरूरेव परा विद्या, गुरूरेव परायणम्, गुरूरेव पराकाष्ठाः, गुरूरेव परमधनम्, परमतत्त्वस्य उपदेष्टुत्वात् गुरोः परतरं गुरूतरं न किञ्चिदपि भवितुमर्हति।

---

289 ब्रह्मविद्योपनिषदम् मं. 31

290 योगशिखोपनिषद् 5/59

291 योगशिखोपनिषद् 5/56

**गुरूरेव परं ब्रह्म गुरूरेव परागतिः**

**गुरूरेव परा विद्या गुरूरेव परायणम्।।**

**गुरूरेव पराकाष्ठा गुरूरेव परं धनम्।**

**यस्मात् तदुपदेष्टाऽसौ तस्माद् गुरूतरो गुरूः।।**[292]

श्रीमद्भागवतपुराणे भगवता "आचार्य माम् विजानीयात्" इति कृत्वा स्वस्य गुरूणा ऐक्यं प्रतिपादितम्। यो गुरूः स एव शिवः यः शिवः स एव गुरू इति शिवपुराणम्

**यो गुरूः स शिवः प्रोक्तो यः शिवः स गुरूः स्मृतः।**

**तस्माद्धि श्री गुरोर्भक्तिर्मुक्ति भक्तिप्रदायिनि।।**[293]

'गुरू' इत्यस्मिन् शब्दे 'गु' इति वर्ण अन्धकारस्य बोधकः तथा 'रू' इति वर्ण अन्धकारस्य निवारकः। अतः अज्ञानन्धकारनिवारक एव गुरूरित्युच्यते यथा

**गु शब्दस्त्वंधकारोऽस्ति रूकारस्तन्निरोधकः**

**अन्धकार निरोधित्वात् गुरूरित्यभिधीयते।।**[294]

अतः सर्वात्मन अज्ञानविनाशकः परब्रह्म एव परमो गुरूः। परं तत्त्वज्ञानं भगवद् भक्तस्य गुरूभक्त वा भवितुमर्हति नान्यस्य। ईश्वरस्य भक्तेः समा एव गुरू भक्तिरपि भवति। गुरू भक्त्या एव वेदानां सकलाः अर्थाः प्रकाशयन्ते -

---

292 अदयतारकोपनिषद् मं. 17-18

293 शिवपुराणम् 6.3.42

294 गुरूगीता

**यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ।**

**तस्येते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः।।**[295]

"विजानन्ति महावाक्यं गुरोचरणसेवया" इति नियमानुसारेण गुरू-चरणयोः सेवक एव वेदान्तमहावाक्यरहस्यं ज्ञातं शक्नोति। विवेकज्ञानस्य उपदष्टारम्, देशिकं परमेश्वरं गुरूं वा अनन्या भक्त्या पूजयेते तेन च दिव्यज्ञानस्य उपलब्धिः जायते। यथा परमभक्त्या ईश्वरस्य आराधनं विधीयते तथैव परमा भक्त्या गुरोराराधनं कुर्यात्।

**दिव्य ज्ञानापदेष्टारं देशिकं परमेश्वरम्**

**पूजयते परमा भक्त्या तस्य ज्ञानफलं लभेत्।**

**यथा गुरूतथैवेशो यथैवशस्तथा गुरूः,**

**पूजनीयो महाभक्त्या न भेदो विद्यतेनयोः।।**[296]

गुरौ ईश्वरे वा भेदं न कुर्यात्। श्रीमद्भगवद्गीतायां भगवता ज्ञान प्राप्तेः उपायक्रमं विवृण्वता पूर्वकं गुरूः चरणयोः प्रणिपातः पश्चात् परिप्रश्नः तथा गुरूसेवयाः विधानं प्रतिपादितम्।

---

295 .योगशिखोपनिषद्-2/22

296 .योगशिखोपनिषद् 5/51 व 58

**तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।**

**उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः।।**[297]

एवं यदि गुरूसेवा भवति तदा तत्त्वज्ञानीगुरूः दिव्यतत्त्वज्ञानं शिष्याय उपदिशति। गुरूगीतायामपि प्रतिपादितं यत् ब्रह्मविष्णुशिवात्मकं इदं जगत गुरूमय एव। नास्ति गुरोः परतरं किञ्चिद्। अतः गुरूमेव सम्यक् भक्त्या पूजयते।

**गुरूरेव जगत्सर्वं ब्रह्मविष्णु शिवात्मकम्।**

**गुरोः परतरं नास्ति तस्माद् संपूजयेद् गुरूम्।।**[298]

प्राणजयिनः सिद्धस्य गुरूदेवस्य सेवा सर्वदा विधेया। तेषाम् आशीर्वादनैव तेषां कृपा लभ्यते तेन च प्राणजयोऽपि प्राप्तुं शक्यते।

**मरूज्जयो यस्य सिद्धः सेवयेत् तं गुरूं सदा**

**गुरूवक्त्र प्रसादेन कुर्यात् प्राणजयं बुधः।।**[299]

शिवसंहितायां गुरू मुखात् विद्यायाः श्रवणेनैव विद्या फलवती भवति इति प्रतिपादितम्।

**भवेद्वीर्यवती विद्या गुरूवक्त्र समुद्भवा।।**

**अन्यथा फलहीन स्यान्निवीर्याप्यतिदुःखदा।।**[300]

---

297 श्रीमद्भगवद्गीता 4/34

298 गुरूगीता

299 योगशिखेपनिषद् 1/80

300 शिवसहिता 3/11

गुरोरेव संसारसागरात् पारगमनाय नाविकः।

**कर्णधारं गुरूं प्राप्य तद्वाक्यं प्लवत्दृढम्।**

**अभ्यास वासना शक्त्या तरन्ति भवसागरम्।।**[301]

गुरोः वाक्यन्येव नौकावत् भवन्ति। अतः तेषां मननाभ्यासेन मानवः भवसागरात् पारं गन्तुं शक्नोति। श्रीमद्भागवते अस्य श्रुतिवचनस्य पुष्टिरूपलभ्यते।

**प्लवम् सुकल्पं गुरू कर्णधारम्।**[302]

मोक्षमूलं गुरोःकृपा इति आप्तवचनानुसारेण गुरूकृपा एव मोक्षस्य कारणम्। गुरूमुखे ब्रह्मणः स्थितिः स्वीकृता। अतः ब्रह्मज्ञानं गुरूपदेशेन गुरूकृपया जायते। यतोहि शिष्यस्य हितकरः गुरूदेवो भवति नान्यः कश्चन। शिवपुराणे च मानवानां पूज्यो देवः, बन्धुरात्मा सर्व गुरूरेव इति प्रतिपादितम्।

**गुरूः शिवो गुरूर्देवो गुरूर्बन्धुशरीरिणाम्।**

**गुरूरात्मा गुरूर्जीवो गुरोरन्यन्न विद्यते।।**[303]

गुरूणा संयोगेनैव संसारबन्धनात् वियोगः भवितुमर्हति। अन्यैः बन्धुबान्धवाः मित्रकलत्रादिभिः सह सम्बन्धः संसारबन्धनं दृढ़यति। योगसिद्धिरपि गुरूकृपा सापेक्षा। ''यो.शि.'' हिरण्यगर्भम् उपदिशन् भगवता शिवेन प्रतिपादितं यत् महतः

---

301 योगशिखेपनिषद् 6/79

302 श्रीमद्भगवत् एकादशस्कन्ध

303 शिवपुराणम्

पुण्येन मनुष्यस्य सिद्धगुरोः संन्निधिर्लभ्यते। तदनन्तरं च एतादृशस्य गुरोः कृपया एव अविद्यात्मकस्य संसारस्य निवृत्तिजार्यते। भगवतः त्रिगुणात्मिका माया अतिदुस्तरा। अतः मायया: निवृत्तिरपि गुरूकृपयैव भवितुमर्हति। गुरूकृपां विना सांसारिक विषयभ्यो उपरतिर्नभवितुमर्हति। तथा तत्त्वदर्शनं सहजावस्था वापि गुरूकृपां विना अतिदुर्लभा।

**दुर्लभो विषयत्यागो दुर्लभं तत्त्वदर्शनम्।**

**दुर्लभा सहजावस्था सद्गुरोः करूणां विना।।**[304]

योगिनां साधनामार्गे एका सिद्धयोगपरम्परा विद्यते। तस्यां परम्परायां योगसिद्धिः गुरोः कृपयैव लभ्यते। यदि पूर्ण सिद्धगुरोः संन्निधिर्जायते तदा सर्वमपि लभ्यते। शिष्यस्य योगक्षेमः गुरूरेव निर्वहति। नाथ सम्प्रदायिस्यापि परम्परा सिद्धयोग परम्परा एव। काश्मीर शैवदर्शने सिद्धिप्राप्यतेः त्रय उपायाः वर्णिताः- प्रथमः शांभवोपायः द्वितीयः शाक्तोपायः तृतीया आणवोपायः।

शांभवोपाये शिवरूपी गुरूः शिष्यं साधकं वा मनोन्मनीं शांभवी च मुद्रां प्रयच्छति। अस्या प्राप्तिः सर्वेषां न भवितुमर्हति। कस्यापि विरलस्यैव एतादृशी उपलब्धिः सिद्धगुरोः कृपया जायते। शांभवी मुद्रायाः वर्णनं श्रुतिष्वपि समुपलभ्यते।

---

304 वराहपुराणम् 2/76

**अन्तर्बाह्यलक्ष्ये दृष्टौ निमेषोन्मेषवर्जितायां सत्यां शांभवी भवति।।**[305]

शाक्तोपाये गुरूदेव: साधकस्य प्रसुप्ता शक्ति: जागर्ति तथा साधक: समाध्युन्मुखो भवति। अनन्तरं समाधि: च लभ्यते। आणवोपाये साधक: साधनयोगमवलम्व्य स्वं लक्ष्यं अभिमुखी कृत्य अभ्यासं करोति। अस्मिन् मार्गे यमनियमाद्यष्टाङ्गयोगक्रमस्य अभ्यासपूर्वकमेव साधना मार्गे योगी प्रवर्तते। मन्त्रजपस्य ध्यानयोगस्य च अभ्यास: अस्मिनुपाये प्रमुखं साधनम्।

ये पुण्यवन्त: साधक: सिद्धगुरो: पावनसान्निध्येन आश्रयेण वा तत्त्वं ग्रह्णान्ति समाधिं च प्राप्नुवन्ति तैरेव सद्गुरो: सार्वत्रिकीं सत्तां महिमां योगैश्वर्यं च अनुभवन्ति। सिद्धगुरूणां साकम् दीक्षासम्बन्धानन्तरं सिद्धगुरू: शिष्यस्य स्वशक्त्या स्वसर्वत्रव्यापकत्तया वा नित्यं निरन्तरं रक्षां अभ्युत्थानं च करोति। एवं प्रकारेण शिष्यस्य समग्रजीवन् नोकाया: संचालनं गुरो: करकमलयोरेव जायते। गुरूस्तावत् दूरस्थोऽपि भौतिकविग्रहरहितोऽपि निरन्तरं शिष्यस्य कृपापूर्णदृष्टया उपकरोति। गुरूरेव ''कर्तुमकर्तुमन्यथाकर्तुं सर्वथाशक्त:'' अतएव एतादृशस्य सिद्धगुरो: प्रकृतौ: पूर्णाधिकार: पूर्णवशित्वं च भवति। एतादृशानां सिद्धगुरूणां सत्यसंकल्पानुसारेण प्रकृतिश्चलति। अमोघ संकल्पवत: गुरो: संकल्पेनैव साधक: यथेष्टं फलं लभते। दिव्यदृष्टिं अन्त: र्दिव्यदृष्टिप्रदातारश्च गुरव: क्षणेनैव मुक्तिं प्रदातुं समर्था:।

---

[305] अद्वयतारकोपनिषद् मं. 12

**गृ शब्दे (क्रियादि) तथा गृ निगरणे इति तुदादि गणीय धातोः वा गुरूः शब्दः सिद्धयति। गृहाति उपदिशति धर्ममिति गुरूः। गिरत्यज्ञानमिति गुरूः। यदा गीर्यतेस्तूय देवगन्धर्वादिभिरिति गुरूः।**

येषां शिष्यानामुपरि गुरोः कृपादृष्टिर्भवति ते साधनामार्गात् प्रच्युताः न भवन्ति। अतः साधनाभ्यासः पूर्णरूपेण गुरोः कृपाम् अवलम्बते। मन्त्रदातागुरूः मन्त्रप्रदानेन सहैव स्वकीयायाः अध्यात्मशक्तेः संचारमपि करोति। एतादृशः शक्तिसंचारः गुरूः यदा वाच्छति तदैव करोति। अस्मिन् कार्ये गुरूः सर्वथा स्वतन्त्रः। अतः शक्तिसंचारस्य कोऽपि समयः नियमो वा निर्धारितो न भवति। यदेव गुरूः पश्यति यत् शिष्यः शक्तिधारणस्य अधिकारी समर्थौ वा तदैव गुरूः तं शिष्यं शक्तिं प्रयच्छति। गुरूः शिष्यस्य आत्मशक्तिं स्वसंकल्पशक्त्या नियन्त्रयति। येन शिष्यः गुरूप्रदत्तायाः दुरूपयोगं न कर्तुमर्हति तथा शिष्यस्य मनसि अहंकारोऽपि न उद्भवति। अहंकारस्य विनाशाय गुरूः शिष्यं सेवाकार्ये नियोजयति। एषा परम्परा अनादिकालात् ऋषिणां गुरूणां वा आश्रमे प्रचलति स्म। शास्त्रेषु लोके च उत्कृष्टकोटिप्राप्तवद्भिः भक्तैः योगीभिश्च गुरोः महिमायाः मानं मुक्तकण्ठेन कृतम्। तथा गुरूकृपामेव मुक्तेः परमं कारणं स्वीकृतम्। मध्ययुगे सहजोबाई नाम्न्याः साधिकायाः घोषणा उपलभ्यते यत्

**गुरू न तजौ हरि तज डारौ'**

एवमेव योगिवर्येण कबीर महाशयेनापि –

**"कबिरा हरि के रूठते गुरू के शरने जाये।**

**कह कबीर गुरू रूठते हरि नहि होत सहाय"**

इत्येवं प्रकारेण गुरूमहिमा सर्वोपरि भवतीति उद्घोषितम्। एवमेव प्रकारेण भक्तप्रवरेण तुलसीदासेन –

**"गुरू बिन भव निधि तरई न कोई, जो विरंचि शंकर समहोई"** इत्युक्त्वा गुरोः माहात्म्यं प्रदर्शितम्। अद्वैताचार्येण आद्यशंकराचार्यमहाभागेन गुरूणा सह कदाचिदपि 'अद्वैतं न भावयेत्' इत्युक्तम्।

विशंति शताब्द्यां श्यामाचरणं लाहिडी नामकः एकः महान योगी बभूव, तस्य योगलाभः योगावतारबाबा महाशयस्य कृपयाः प्रत्यक्षं फलम् इति सर्वजनप्रसिद्धिः। अन्यथा लाहिडी महाशयः योगस्य परमामवस्थां कदापि प्राप्तुं न समर्थः। परम तैः गुरूकृपया सद्यैव योगस्य चरमावस्था सम्प्राप्तः। यदि वयं कस्यापि महायोगिनः जीवनवृत्तं पश्यामः तदा जानीमः, यत् कस्यापि सद्गुरोः महापुरूषस्य परमाकृपा योगिनमुपरि अवश्यमासीत्। कदाचित् वयं पश्यामः यत् लौकिकरूपेण कस्यापि कोऽपि गुरूः न भवति परन्तु साधकस्य साधनामार्गे उत्कृष्टावस्थादृश्यते। अस्य कारणम् इदमेव यत् एतादृश योगिनः साधना नैकपूर्वजन्मपरम्परायां निरन्तरं प्रचलति। एतादृशस्यापि योगिनःयस्मिन् कस्मिनपि जन्मनि अवश्यमेव कोऽपि सिद्धगुरूः अवश्यमेव आसीत्। स एव सिद्धः गुरूः अव्यक्तरूपेण एतादृशं साधकं प्रति कृपादृष्टिं करोति। अन्यथा एतादृशे मायामये संसारे गुरूः कृपयाऽभावे योगिन

अवश्यमेव योगमार्गात् प्रच्युतिर्भवेत। गुरो: सर्वदिक्कालव्यापिनी सत्ता शिष्यं सर्वदा यो मार्ग भ्रंशात् रक्षति। गुरू: गीतायां विशेषेण एतद् प्रतिपादितं यत् यदि साधक: मुक्तिं वांछति तर्हि आजीवनं गुरू संनिधिं गुरोराधनां न त्यजेत् गुरो: भयेन अनुशासनेनैव साधकस्य जीवनं प्रकाशितं भवति। यदा जीवने पूर्व पुण्यानाम् आविर्भावो भवति तदा तेषां सर्वेषां पूर्वकृतपुण्यानां संमिलनेन सद्गुरो: संनिधि: प्राप्यते। तथा एतादृश: गुरूरपि ईश्वरस्य शरीरधारी विग्रह एव भवति इति मत्वा शिष्य: गुरूं सेवते तदा गुरूकृपालाभ: तस्य जायते।

सर्वै: योगाभ्यासिभि: भक्तै: उपासकै: साधकै: "ध्यानं मूलं गुरोर्मूर्ति:" इति सिद्धान्तानुसारेण गुरूमूर्ते: ध्यानं सर्वत: प्रथममत्यावश्यकम् इति नियम प्रतिपादित: भक्तप्रवरेण तुलसीदासेन **"श्री गुरू पद नख मणिगणज्योति सुमिरत दिव्य दृष्टि हिय होती"** इत्येवमुक्त्वा उपर्युक्तस्य सिद्धान्तस्य पुष्टि: कृता। योगदर्शने महर्षि पतञ्जलि **"वीतराग विषयं वा चित्तम्"** इति सूत्रयित्वा प्रतिपादितं यत् वीतरागिणां महापुरूषाणां स्वरूपस्य ध्यानेन समाधि सिद्धिर्जायते इति। एतद् सिद्धान्तानुसारेणैव योगिन: गुरूमूर्ते ध्यानेन सकलं ज्ञानं ऋद्धिं सिद्धिं च प्राप्नुवन्ति। "सिद्धसिद्धान्तपद्धति" नामके ग्रन्थे महायोगी गोरक्षनाथेन "दुर्लभा चित्तविश्रान्ति: विना गुरू कृपां पराम्" इत्युक्त्वा सद् गुरो: कृपाया: माहात्म्यं प्रदर्शितम्। गुरू: ब्रह्मरूपो भवति। अमोघा च तस्य संकल्पशक्तिर्भवति। अतएव गुरूगीतायां भगवता शिवेन "मोक्षमूलं गुरो: कृपा" इति उद्घोषितम्।

मनुष्यस्य कृते जरा-जन्म-मृत्युः-व्याधिः-कामः-क्रोधः-मोहः (अविद्या) अहंकारः इत्येते अष्टौ पाशाः भवन्ति। शिष्यस्य एतान् अष्टपाशान् गुरूः स्वकरूणां दृष्टया छिनत्ति। अतः एतादृश एव पाशभेदकः परमानन्द प्रदाता च सद्गुरू भवितुमर्हति।

**करूणाखण्डपातेनाच्छित्वा पाशाष्टकं शिशोः।**

**सम्यगानन्द जनकः सद् गुरोः सोऽभिधीयते।।**

एतेन अयमेव निष्कर्षः भवति यत् सिद्गुरोः कृपां विना साधनासिद्धिः साध्यम् चेति त्रिकं अतीव त्रिकं अतीव दुर्लभम् इति।